# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा एप्रिल – २०१६

| | | |
|---|---|---|
| कक्षा – शास्त्री-१ (SEM-2) | **प्रश्नपत्रम् – १** | गुणाः - ७० |
| विषयः - अनिवार्यसंस्कृतम् | **CF-122** | समयः - ११ तः २ |
| दिनाङ्कः - १६/४/२०१६ | सन्दर्भग्रन्थः – मध्यसिद्धान्तकौमुदीनियतांशः कर्णाभारश्च । | |

**केवलं व्याकरणेतरशास्त्रीयपरीक्षार्थिनां कृते**

**प्रथमान्वितिः -१**

**प्रश्नः -१ अधोनिर्दिष्टेषु द्वयोः सूत्रयोः व्याख्यां करोतु ।** ०८

(१) न पदान्ताट्टोरनाम् ।

(२) उदः स्थास्तम्भोः पूर्वस्य ।

(३) ङ्णोः कुक् टुक् शरि ।

(४) कानाम्रेडिते ।

**प्रश्नः -२ निम्नलिखितेषु चतुर्णां प्रयोगाणां सूत्रनिर्देशपूर्वकं सिद्धिं करोतु ।** ०८

सच्चित् । षण्णाम् । वागीशः । उत्थानम् । तच्छिवः । संस्स्कर्ता । काँस्कान् ।

**प्रश्नः -३** वरदराजाचार्यस्य कृतिं लिखतु । ०४

अथवा

पाणिनिमुनेः ग्रन्थानां नामानि लिखन्तु ।

**प्रश्नः - ४ कश्चिदेकस्य विभागस्योत्तरं यच्छन्तु ।** ०५

**(१) सन्धिं कुर्वन्तु –**

रामस् + चिनोति, विश् + नः, रामस् + टीकते, सन्+षष्ठः, सम्+राट्

**(२) सन्धिविच्छेदं कुर्वन्तु –**

प्राङ्खषष्ठः, सञ्छम्भुः, सन्नच्युतः, पुँस्कोकिलः, शिवच्छाया ।

**द्वितीयान्वितिः - २**

**प्रश्नः -५ केषाञ्चित् त्रयाणां सोदाहरणं व्याख्या कार्या ।** १२

(१) विसर्जनीयस्य सः ।

(२) ससजुषो रुः ।

(३) भोभगोअघो अपूर्वस्य योऽशि ।

(४) हशि च ।

(५) हलि सर्वेषाम् ।

(६) ढोढे लोपः ।

**प्रश्नः -६ चतुर्णां प्रयोगाणां ससूत्रं सिद्धिः कार्या ।** ०८

शिबोवन्द्यः । देवायिह । भो देवाः । अहरहः ।

पुना रमते । एष विष्णुः ।मनोरथः । सैषदाशरथी रामः ।

## तृतीयान्वितिः - ३

**प्रश्नः -७ द्वयोः ससन्दर्भं व्याख्या विधेया ।** ०८

(१) मा तावन्मम शरमार्गलक्षभूताः
सम्प्राप्ताः क्षितिपतयः सजीवशेषाः ।
कर्तव्यं रणशिरसि प्रियं कुरूणां
द्रष्टव्यो यदि स भवेद्धनञ्जयो मे ॥

(२) इमे हि दैन्येन निमीलितेक्षणा
मुहुः स्खलन्तो विवशास्तुरङ्गमाः ।
गजाश्च सप्तच्छददानगन्धिनो
निवेदयन्तीव रणे निवर्तनम् ॥

(३) शिक्षा क्षयं गच्छति कालपर्ययात्
सुबद्धमूला निपतन्ति पादपाः ।
जलं जलस्थानगतं च शुष्यति
हुतं च दत्तं च तथैव तिष्ठति ॥

**प्रश्नः -८ अधोलिखितयोरेकस्य उत्तरं यच्छत ।** ०८

(१) कर्णभारस्य सारभागं लिखतु ।

(२) कर्णभारे शल्यस्य चरित्रं वर्णयत ।

**प्रश्नः -९ द्वयोः टिप्पणी विधेया ।** ०४

(१) सूर्यः स्वभावरूचिमानिव भाति कर्णः ।

(२) नास्ति निष्फलता रणे ।

(३) यदा स्मरसि तदा लभस्व ।

(४) भरतवाक्यम् ।

**प्रश्नः -१० पञ्चानाम् एकैकवाक्यद्वारा उत्तराणि लेख्यानि ।** ०५

(१) कर्णभारस्य कर्ता कः ?

(२) कर्णः शक्राय किं ददाति ?

(३) राधेयः इत्यस्य कोऽर्थः ?

(४) नागकेतुः कस्य विशेषणम् अस्ति ?

(५) इन्द्रसन्देशवाहकः कः ?

(६) अङ्गदेशस्य राजा कः ?

(७) क्षेयं का गच्छति ?

***